Roll No : ......................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# APG–1020

## M.A. (Previous) Examination, 2021

## SANSKRIT

Paper - I

**(वैदिक वाङ्मय)**

*Time : 1½ Hours* ] [ *Maximum Marks : **100***

**(खण्ड–अ)** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**(खण्ड–ब)** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**(खण्ड–स)** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ** 2 each

1. निम्नांकितेषु प्रश्नेषु सर्वेषां प्रश्नानामुत्तराणि देयानि, नैव पञ्चाशताधिकशब्देषु भवितव्यमुत्तरम्–

   (i) 'नासदीयसूक्तस्य' कः ऋषिः छन्दः देवताश्च कः इति लिख्यताम् ?

   (ii) तानि धर्माणि प्रथमान्यासन् वेदवाक्यमिदं कस्य सूक्तस्य, अस्य कः अभिप्रायः ?

(iii) 'कालसूक्तस्य' कः अभिप्रायः ? संस्कृतेन लेख्यः।

(iv) 'पर्जन्यः पिता स उ नः पिवर्तु' अस्य कः अभिप्रायः ? ऋषि देवता छन्दश्च कथनीयः।

(v) 'पुनः पुनर्वशमापद्यते मे' अस्य कः अभिप्रायः ?

(vi) 'सा काष्ठा सा परागतिः' अस्यः कः अभिप्रायः ?

(vii) कति भावविकारा भवन्ति ? नामानि लिखत।

(viii) 'समाम्नायः समाम्नातः' अस्य कः अभिप्रायः ?

(ix) कृष्णयजुर्वेदस्य शाखानां नामोल्लेखः करणीयः।

(x) आरण्यकग्रन्थस्य वैशिष्ट्यं लिखत।

**खण्ड–ब** 8 each

निम्नांकितेषु प्रश्नेषु केषाञ्चित् **पञ्च**प्रश्नानामुत्तरं द्विशत–शब्देषु देयम्। प्रश्नसंख्या 3, 4, 7 अनिवार्याः सन्ति।

2. निम्नांकितस्य मन्त्रस्य सप्रसंगव्याख्या करणीया–

मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती।

उन्नो वीराँ अर्पय भेषजेनिर्भिषक्तमं त्वा भिषजां शृणोमि॥

**अथवा**

त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः।

ततो विष्वङ्व्यक्रामत् साशनानशने अभि॥

3. निम्नांकितस्य मन्त्रस्य व्याख्या देवगिरा करणीया–

स नः पितेव सूनवे अग्ने सूपायनो भव।

सचस्वा नः स्वस्तये॥

**अथवा**

उषो वाजेन वाजिनि प्रचेताः स्तोमं जुषस्व गृणतो मघोनि।

पुराणी देवि युवतिः पुरंधिरनु व्रतं चरसि विश्ववारे॥

4. उपर्युक्त मन्त्रयोरेकस्य मन्त्रस्य पदपाठः करणीयः।

5. निम्नांकितस्य मन्त्रस्य सप्रसंग व्याख्या करणीया—

यद् वो मनः परागतं यद् बद्धमिह वेह वा।

तद् व आ वर्तयामसि मयि वो रमतां मनः॥

**अथवा**

असंबाधंबध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु।

नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः॥

6. निम्नांकितस्य मन्त्रस्य सप्रसंग व्याख्या करणीया—

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः।

तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते॥

**अथवा**

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः।

तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते।

तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन। एतद्वैतत्॥

7. निम्नांकितानां चतुर्णां शब्दानां निर्वचनं संस्कृतेन करणीयम्—

(i) दक्षिणा

(ii) नरकम्

(iii) समुद्रः

(iv) शाखाः

(v) नरकम्

(vi) आदित्यः

(vii) अन्तरिक्षम्

(viii) रात्रिः

8. ऋग्वेदस्य महत्वं प्रस्तूयताम्।

## खण्ड–स

प्रत्येक 20 20 each

निम्नांकितेषु प्रश्नेषु **द्वयोः** प्रश्नयोः उत्तराणि पञ्चशत परिमितैः शब्दैः खलु देयानि–

9. अथर्ववेदस्य विषयवस्तुः विस्तरेण लेखनीयः।

10. उपनिषद् ग्रन्थानां परिचयो देयः।

11. कठोपनिषदि वर्णितं नैतिकशिक्षानां संक्षेपेण विवेचनं कुरुत।

12. अधोलिखितेषु द्वयोर्गद्यभागयोः व्याख्या विधेया–

    (क) तद् यानि चत्वारि पदजातानि नामाख्यात चोपसर्गनिपाताश्च तानीमानि भवन्ति।

    (ख) षड्भावविकारा भवन्तीति वार्ष्यायणिः।

    (ग) तत्र नामानि आख्यातजानि इति शाकटायनो नैरुक्त समयश्च।

    (घ) न सर्वाणि इति गार्ग्यो वैयाकरणानां चौके।